# ।। बृहस्पतिस्तोत्रम् ।।

अस्य श्रीबृहस्पतिस्तोत्रस्य
गृत्समद ऋषिः
अनुष्टुप् छन्दः
बृहस्पतिर्देवता
बृहस्पतिप्रीत्यर्थं जपे विनियोगः

गुरुर्बृहस्पतिर्जीवः सुराचार्यो विदांवरः ।
वागशो धिषणो दीर्घश्मश्रुः पीताम्बरो युवा ।।१।।
सुधादृष्टिर्ग्रहाधीशो ग्रहपीडापहारकः ।
दयाकरः सौम्यमूर्तिः सुरार्च्यः कुड्मालद्युतिः ।।२।।
लोकपूज्यो लोकगुरुर्नीतिज्ञो गीतिकारकः ।
तारापतिश्चाङ्गिरसो वेदवैद्यपितामहः ।।३।।
भक्त्या बृहस्पतिं स्मृत्वा नामान्येतानि यः पठत् ।
अरोगी बलवान् श्रीमान् पुत्रवान् स भवेन्नरः ।।४।।
जीवेद्वर्षशतं मर्त्यो पापं नश्यति नश्यति ।
यः पूजयेद्गुरुदिने पीतगन्धाक्षताम्बरैः ।।५।।
पुष्पदीपोपहारैश्च पूजयित्वा बृहस्पतिम् ।
ब्राह्मणान्भोजयित्वा च पीडाशान्तिर्भवेद्गुरोः ।।६।।

इति श्रीस्कन्दपुराणे बृहस्पतिस्तोत्रं संपूर्णम् ।।